# Ashtamatrika Stotram

# अष्टमातृकास्तोत्रम्

## Document Information

Text title : Ashtamatrika Stotram

File name : aShTamAtRRikAstotram.itx

Category : devii, buddha, stotra, devI

Location : doc_devii

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods,

Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# अष्टमातृकास्तोत्रम्

ॐ नमः श्रीविघ्नेश्वराष्टमातृकाभ्यः ।
विघ्नेश्वर महावीर सिद्धिरूपाय वृद्धये ।
विघ्ननाशाय देवाय गणेशाय नमाम्यहम् ॥ १॥

पूर्वे ब्रह्माणी देवी हंसमारुह्य संस्थिता ।
पीतवर्णप्रभा देवी श्रीब्रह्माणि नमोऽस्तु ते ॥ २॥

दक्षिणे श्रीवाराही महिषासनसंस्थिता ।
रक्तवर्णाऽङ्कुशहस्ता श्रीवाराहि नमोऽस्तु ते ॥ ३॥

पश्चिमे चेन्द्राणी देवी गजमारुह्य संस्थिता ।
कुङ्कुमाभा वज्रहस्ता श्रीइन्द्राणि नमोऽस्तु ते ॥ ४॥

उत्तरे माहेश्वरी देवी वृषमारुह्य संस्थिता ।
श्वेतवर्णप्रभा देवी माहेश्वरि नमोऽस्तु ते ॥ ५॥

आग्नेये बालकौमारी मयूरकान्तिपूरणी ।
रक्तवर्णा शक्तिहस्ता श्रीकौमारि नमोऽस्तु ते ॥ ६॥

नैर्ऋत्ये वैष्णवी देवी श्यामाभा गरुडासना ।
शङ्खचक्रधरा देवी नारायणि नमोऽस्तु ते ॥ ७॥

वायव्ये चामुण्डा देवी सिंहमारुह्य संस्थिता ।
ककारमूर्तिधारी च खड्गहस्तां नमाम्यहम् ॥ ८॥

ईशाने चण्डिका देवी धूम्रवर्णा प्रज्वालिनी ।
कर्तिमुण्डधरा देवी महालक्ष्मि नमोऽस्तु ते ॥ ९॥

अष्टपीठस्थिता देवीरष्टवृक्षनिवासिनीः ।
अष्टभैरवसंयुक्ता अष्टमातृका नमाम्यहम् ॥ १०॥

सूर्यः सोमो महीपुत्रो बुधो देवासुरगुरू ।

शनिश्च राहुः केतुश्च यमाय च नमो नमः ॥ ११ ॥

इति श्री अष्टमातृकास्तोत्रं सम्पूर्णम् ॥

*Ashtamatrika Stotram*

pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*